Topic 39

# अदादिगणीय विद् धातु

विदो लटो वा ।

वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः ।
वेद , विदतुः , विदथुः , विद । वेद, विद्व, विद्म ।
पक्षे - वेत्ति । वित्तः । विदन्ति ।

उषविदजागृभ्योऽन्यतरस्याम् ।

एभ्यो लिटि आम् वा स्यात् । विदेरदन्तत्वप्रतिज्ञानादामि न गुणः । विदाञ्चकार ।
विवेद । वेदिता । वेदिष्यति ।

विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ।

वेत्तेर्लोटि आम् गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा ~~निपा~~ निपात्यते ।
पुरुषवचने न विवक्षिते ।

तनादिकृञ्भ्य उः ।

तनादेः कृञश्च उः प्रत्ययः स्यात् ।
शपोऽपवादः । विदाङ्करोतु ।

अत उत् सार्वधातुके

उप्रत्ययान्तस्य कृञोऽत उत् सार्वधातुके
क्ङिति । विदाङ्कुरुतात् । विदाङ्कुरुताम् ।
विदाङ्कुर्वन्तु । विदाङ्कुरु । विदाङ्करवाणि ।
अवेत् । अवित्ताम् । अविदुः ।

दश्च ।

धातोर्दस्य पदान्तस्य सिपि परे रुर्वा । अवेः,
अवेत् । विद्यात् । विद्यास्ताम् । अवेदीत् ।
अवेदिष्यत् ।

सिप् परे होने पर दकारान्त धातु-पद के
स्थान पर विकल्प से 'रु' आदेश होता है,
'अलोऽन्त्यस्य' परिभाषा से यह आदेश अन्त्य
दकार के ही स्थान पर होता है। उदाहरण के लिए
'विद्' धातु से लङ् लकार में मध्यमपुरुष एकवचन
की विवक्षा में सिप्, शप्-लुक् और अट् आदि
होकर 'अवेद् स' रूप बनता है, यहाँ (हल्ङ्या~~ब्भ्यो~~)
हल्ङ्याब्भ्यो-०' से सिप् के अपृक्त सकार का
लोप होकर 'अवेद्' रूप बनेगा। इस स्थिति में
सिप् परे होने के कारण प्रकृत सूत्र से दकार
के स्थान पर 'रु' होकर 'अवेरु' रूप बनता है।
रुत्व-विसर्ग होकर 'अवेः' रूप सिद्ध होता है।
विकल्पावस्था में 'अवेद्' के दकार के स्थान पर
चर्त्व तकार होकर 'अवेत्' रूप सिद्ध होगा।